दिनाङ्कः : 25/12/2024 सायम् - 06:20

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अद्य मध्यप्रदेशस्य खजुराहो- स्थले केन-बेतवा-राष्ट्रिय-नदी-संयोजन- परियोजनायाः शिलान्यासं स्थापितवान्।
- राष्ट्रमद्य पूर्वप्रधानमन्त्रिणः अटलबिहारी- वाजपेयिवर्यस्य शततमीं जयन्तीं सुशासन-दिवसत्वेन आमानयति।
- केन्द्रीयगृहसहकारितामन्त्री अमितशाहः अद्य नवदिल्ल्यां दशसहस्राधिकं स्थापिताः बहूद्देशीय – प्राथमिक – कृषि – सहकारिसंस्थाः, दुग्धोत्पादक-मत्स्यपालनसहकारिसंस्थाः च राष्ट्राय समर्पितवान्।
- अद्य कजाकिस्तानदेशे अक्ताऊ- विमानस्थानकस्य समीपे यात्रिविमान- दुर्घटनायां पञ्चाशदधिकं जनाः मृत्युम् उपगताः ।
- क्रिसमस् पर्व अद्य सम्पूर्णजगति महता उल्लासेन परिपाल्यते, ईसा- मसीहस्य जयन्त्यवसरे इदं पर्व आमान्यते।

प्रधानमन्त्री – परियोजनामध्यप्रदेशः

प्रधानमन्त्री नरेन्द्रमोदी अद्य पूर्वप्रधानमन्त्रिणः भारतरत्न- अटलबिहारी- वाजपेयिवर्यस्य शततम्यां जयन्त्यां मध्यप्रदेशस्य खजुराहो- स्थले देशस्य प्रथमायाः महत्वकांक्षिणः बहुद्देशीय- केन-बेतवा-राष्ट्रिय-नदी- संयोजन- परियोजनायाः शिलान्यासं कृतवान्। अत्रावधौ प्रधानमन्त्रिणा देशस्य प्रथमायाः ओङ्कारेश्वर- फ्लोटिंग- सोलर- इत्यस्याः परियोजनायाः अपि उद्घाटनं विहितम्।

अत्रावसरे त्रिपञ्चाशदधिकैक- शतोत्तरैकसहस्र- संख्यकानाम् अटलग्राम- सुशासन भवनानां भूमिपूजनमपि अकरोत्। श्रीमोदी वाजपेयि- वर्यस्य स्मृतौ एकां प्रैष्य- चिटिकां मुद्रामपि

प्रकाशितवान्। अत्रावसरे प्रधानमन्त्री प्रोक्तवान् यत् भारतीय- जनता- पार्टीति- दलाय सुशासनं केवलम् एकदिवसीय- समायोजनं नास्ति अपि तु प्रशासनस्य अभिज्ञानं वर्तते। पूर्वप्रधानमन्त्रिणः अटल- बिहारी- वाजपेयिवर्यस्य स्मृतयः विनिमयीकृत्य श्रीमोदी न्यगादीत् यत् अटलवर्यः सुशासनस्य उत्तमसेवायाः च प्रेरणास्त्रोतः अस्तीति।

प्रधानमन्त्री बाबा- साहेब- अम्बेडकरस्य भूमिकां प्रशंसयन् अवदत् यत् भारतस्य जलसंसाधनानां सुदृढीकरणाय जलप्रबन्धनाय जलबन्धनिर्माणाय च डॉ अम्बेडकरस्य दूरदर्शिता महत्वपूर्णं योगदानं प्रदत्तवती। देशे पर्यटनं प्रवर्धयितुं प्रशासनस्य प्रयत्नान् उल्लेखयन् श्रीमोदी आश्वासितवान् यत् केन्द्रप्रशासनं देशविदेशयोः समेषां पर्यटकानां कृते सौकर्याणि समेधितुं नैरन्तर्येण प्रयतमानं विद्यते। एतस्मिन् कार्यक्रमे मध्यप्रदेशस्य राज्यपालः मंगूभाई पटेलः मुख्यमन्त्री डॉ. मोहन यादवः केन्द्रीयजलशक्तिमन्त्री सी.आर. पाटिलः च उपस्थिताः समभवन्। अवधेयं वर्तते यत् केन- बेतवा- राष्ट्रिय - नदी- संयोजन- परियोजना पञ्चाधिक- षड्शतोत्तर- चतुश्चत्वारिंशत्सहस्र- कोटिरूप्यकाणां व्ययेन स्थापितास्ति। एषा परियोजना मध्यप्रदेशस्य उत्तरप्रदेशस्य च विभिन्नजनपदेभ्यः सिञ्चन- सौविध्यानि प्रदास्यति येन लक्षशः कृषकपरिवाराः लाभान्विताः भविष्यन्ति। अस्याः परियोजनायाः कारणात् अस्य क्षेत्रस्य जनानां कृते पेयजलापूर्तिरपि भविष्यति।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।।

सुशासनदिवसः

राष्ट्रपतिः द्रौपदीमुर्मुः उपराष्ट्रपतिः जगदीप-धनखड़ः प्रधानमन्त्री नरेन्द्रमोदी च पूर्व-प्रधानमनत्रिणः अटल-बिहारी-वाजपेयिनः शत-तम-जयन्त्यवसरे राजधान्यां नवदिल्ल्यां 'सदैव अटल' स्मारके पुष्पाञ्जलिम् अर्पितवन्तः। अत्रावसरे पूर्व-राष्ट्रपतिः राम-नाथ-कोविन्दः रक्षामन्त्री राजनाथसिंहः लोकसभाध्यक्षः ओम-बिरला भाजपा-दलस्य राष्ट्रियाध्यक्षः जेपी नड्डाः अन्ये

जनाश्च पूर्वप्रधानमन्त्रिणे पुष्पाञ्जलिम् अर्पितवन्तः।

केन्द्रीयगृहसहकारितामन्त्री अमितशाहः

केन्द्रीयगृहसहकारितामन्त्री अमितशाहः अद्य नवदिल्ल्यां दशसहस्राधिकं नवस्थापिताः बहूद्देशीय – प्राथमिक – कृषि – सहकारिसंस्थाः, दुग्धोत्पादक- मत्स्यपालनसहकारिसंस्थाः च राष्ट्राय समर्पितवान्। असौ राष्ट्रिय- सहकारिता- सम्मेलनस्य समये नवसङ्घटित- सहकारिता- समितये पञ्जीकरणप्रमाणपत्राणि, रुपे किसानक्रेडिट्कार्ड्, माइक्रो- एटीएम इत्येतानि च वितरितवान्। एतैः वित्तीयपत्रैः पञ्चायतेषु ऋणसुविधाः वित्तीयसमावेशं च वर्धिष्यति। अपिच ग्रामीणेभ्यः योजनानां लाभः सरलतया भविष्यति। एताः समितयः ग्रामीण- क्षेत्रेषु सहकारि संस्थानानां विकासकार्ये सहायकाः भविष्यन्ति। मन्त्रिणा सबलं प्रकाशितं यत् पूर्वंयदा देशे आधारभूत- संरचनाभ्यः प्राथमिकता नैव प्रदत्तासीत् तदा पूर्वं प्रधानमन्त्रिणा अटल बिहारी वाजपेयिवर्येण स्वर्णिम- चतुर्भुज- मार्गः शुभारम्भितः।

प्रधानमन्त्री स्वामित्वयोजना

प्रधानमन्त्री नरेन्द्रमोदी आगामिनि शुक्रवासरे स्वामित्वयोजनायाः अन्तर्गतं पञ्चाशल्लक्षाधिक - सङ्ख्यकानि सम्पत्तिपत्राणि वितरिष्यति। श्रीमोदी योजनायाः लाभार्थिभिः सह संवादमपि समाचरिष्यति । योजनायाः अन्तर्गतं ग्राम्य- जनसङ्ख्यासु उत वा निवासक्षेत्रेषु प्रत्येकं निवसते सम्पत्तिस्वामिने अधिकारस्य प्रतिवेदनम् प्रदास्यते। पञ्चायतीराजमन्त्रालयेन उक्तं यत् स्वामित्वयोजना एतेषां भूस्वामिनां स्वसम्पत्त्याः मुद्रीकरणं कृत्वा सक्षमं ऋणप्राप्त्यर्थं साहाय्यं करिष्यति तथा च सम्पत्तिसम्बद्धविवादान् न्यूनीकरणं करिष्यति। पञ्चायतीराजसचिवेन विवेकभारद्वाजेन वार्ताहरैः सह वार्तालापं कुर्वता उक्तं यत् अस्याः योजनायाः अन्तर्गतं ड्रोन इत्यस्य निरीक्षणेन प्रायशः सप्तदशसहस्रोत्तर - त्रिलक्षं यावत् ग्रामाणां निरीक्षणम् अभवत्।

क्रिसमिस पर्व-

क्रिसमस् पर्व अद्य सम्पूर्णजगति महतोल्लासेन परिपाल्यते, भगवत: ईसा मसीहस्य जयंत्यवसरे इदं पर्व आमान्यते। अस्मिन् पर्वणि जना: परस्परम् उपहारान् वितरन्ति। राष्ट्रपति: द्रौपदी-मुर्मु: उपराष्ट्रपति: जगदीप धनखड: प्रधानमंत्री नरेन्द्रमोदी च जनेभ्य: क्रिसमस्-पर्वण: शुभकामना: अयच्छन्। एकस्मिन् सन्देशे राष्ट्रपति: द्रौपदी-मुर्मु: उक्तवती यत् क्रिसमस पर्व प्रेम्ण:

सद्भावनायाश्च सन्देशं यच्छति। उपराष्ट्रपतिना उक्तं यत् इदं पर्व सद्भावं सहानुभूतिं क्षमां च स्मारयति। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् पर्वणाम् ऋतु: समेभ्य: प्रसन्नतां शान्तिं समृद्धिः च यच्छेत्।

कजाकिस्तानदेशस्य यात्रीविमानं दुर्घटितम्

अद्य कजाकिस्तानदेशस्य अक्ताऊ- विमानस्थानकस्य समीपे यात्रिविमानं दुर्घटितम् । पञ्चाशदधिकं जनाः मृत्युं संप्राप्तवन्तः। अजरबैजानविमानसेवायाः विमानं अजरबैजानदेशस्य बाकुतः रूसदेशस्य ग्रोजनी- नगरं प्रति गच्छद् आसीत्। सप्तषष्टि- यात्रिणः चालकदलस्य च पञ्च सदस्याः च विमाने स्थिताः आसन् । कुज्झटिकायाः कारणेन विमानस्य मार्गः परिवर्तितः । कजाकिस्तानस्य स्वास्थ्यमन्त्रिणा अकमारल् अल्नाजारोवा इत्यनेन उक्तं यत् प्रारम्भिक-प्राप्तप्रतिवेदनेषु दुर्घटनायां षड् जनाः जीविताः आसन्, येषां स्थितिः गम्भीरा वर्तते।